# prabodhanastotram dashAvatAra suprabhAtam

# પ્રબોધનસ્તોત્રમ્ અથવા દશાવતાર સુપ્રભાતમ્

## Document Information

Text title : prabodhanastotram

File name : prabodhanastotram.itx

Category : suprabhAta, vishhnu, dashAvatAra, vishnu

Location : doc_vishhnu

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 12, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# પ્રબોધનસ્તોત્રમ્ અથવા દશાવતાર સુપ્રભાતમ્

વૃન્દાવને હરિપ્રબોધનવિધિઃ ।

વ્રતચૂડામણિઃ
(અત્રૈવ હિ પ્રકર્તવ્યઃ પ્રબોધસ્તુ હરેઃ ખગ ।
હતઃ શઙ્ખાસુરો દૈત્યો નભંસઃ શુક્લપક્ષકે ।
એકાદશ્યાં તતો વિષ્ણુઃ ચાતુર્માસ્યેષુ સુપ્તવાન્ ।
ક્ષીરોદધૌ જાગ્રતોઽસાવેકાદશ્યાં તુ કાર્તિકે ।
અતઃ પ્રબોધનં કાર્યમેકાદશ્યાં તુ વૈષ્ણવૈઃ ॥)

પ્રબોધનસ્તોત્રમ્
ઉત્તિષ્ઠોત્તિષ્ઠ શઙ્ખઘ્ન ઉત્તિષ્ઠ શ્રુતિસાધક ।
ઉત્તિષ્ઠ જગદાધાર ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૧॥

ઉત્તિષ્ઠ ધરણીધાર મન્થાનગિરિધારક ।
કૂર્મરૂપધરોત્તિષ્ઠ ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૨॥

ઉત્તિષ્ઠોત્તિષ્ઠ વારાહ દંષ્ટ્રોદ્ભૃતવસુન્ધર ।
હિરણ્યાક્ષપ્રાણઘાતિન્ ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૩॥

હિરણ્યકશિપુઘ્ન ત્વં પ્રહ્લાદાનન્દદાયક ।
લક્ષ્મીપતે સમુત્તિષ્ઠ ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૪॥

ઉત્તિષ્ઠ બલિદર્પઘ્ન દેવેન્દ્રપદદાયક ।
ઉત્તિષ્ઠાદિતિપુત્ર ત્વં ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૫॥

ઉત્તિષ્ઠ હૈહયાધીશસમસ્તકુલનાશન ।
રેણુકાઘ્ન ત્વમુત્તિષ્ઠ ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૬॥

ઉત્તિષ્ઠ રક્ષોદમન અયોધ્યાસ્વર્ગદાયક ।
સમુદ્રસેતુકર્તસ્ત્વં ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૭॥

ઉત્તિષ્ઠ કંસહરણ મદઘૂર્ણિત લોચન ।
ઉત્તિષ્ઠ હલપાણે ત્વં ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૮॥

ઉત્તિષ્ઠ ત્યં ગયાવાસિન્ ત્યક્તલૌકિકવૃત્તિક ।
ઉત્તિષ્ટ પદ્માસનગ ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૯॥

ઉત્તિષ્ઠ મ્લેચ્છનિવહ ખડ્ગસંહારકારક ।
અશ્વવાહ યુગાન્ત ત્વં ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૧૦॥

ઉત્તિષ્ઠોત્તિષ્ઠ ગોવિન્દ ઉત્તિષ્ઠ ગરુડધ્વજ ।
ઉત્તિષ્ઠ કમલાકાન્ત ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૧૧॥

ઇત્યુક્ત્વા શઙ્ખભેર્યાદિ પ્રાતઃ કાલે તુ વાદયેત્
વીણાવેણુ મૃદઙ્ગાદિ નૃત્તગીતાદિ કારયેત્ ॥

ઉત્થાપયિત્વા દેવેશં પૂજાં તસ્ય વિધાય ચ ।
સાયં કાલે પ્રકર્તવ્યઃ તુલસ્યુદ્વાહકો વિધિઃ ॥

Encoded and proofread by Shree Devi Kumar

---

*prabodhanastotram dashAvatAra suprabhAtam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*